# चिन्मया बालविहार

## गुरु-स्तोत्रम्



अखण्ड-मण्डलाकारम् व्याप्तं येन चराचरम्।
तत्पदं दर्शितं येन तस्मै श्री गुरवे नमः॥ (१)

अज्ञान-तिमिरान्धस्य ज्ञानाञ्जन शलाकया।
चक्षुरुन्मीलितं येन तस्मै श्री गुरवे नमः॥ (२)

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।
गुरुरेव परम्ब्रह्म तस्मै श्री गुरवे नमः ॥ (३)

स्थावरं जङ्गमं व्याप्तम् यत्किञ्चित् सचराचरम्।
तत्पदं दर्शितं येन तस्मै श्री गुरवे नमः॥ (४)

चिन्मयं व्यापि यत्सर्वम् त्रैलोक्यं सचराचरम्।
तत्पदं दर्शितं येन तस्मै श्री गुरवे नमः॥ (५)

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम-देव-देव॥ त्वमेव सर्वं गुरुदेव देव।

## प्रार्थना

ॐ सह नाववतु, सह नौ भुनक्तु, सह वीर्यं करवावहै, तेजस्विनावधीतमस्तु, मा विद्विषावहै।
ॐ शान्तिः शान्तिः शान्तिः

वक्रतुन्ड महाकाय सूर्य कोटि समप्रभ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा॥

सरस्वति नमस्तुभ्यम् वरदे कामरूपिणि।
विद्यारम्भं करिष्यामि सिद्धिर्भवतु मे सदा॥

षडाननं कुम्कुमरक्तवर्णम् महामतिं दिव्यमयूरवाहनम्।
रुद्रस्य सूनुं सुरसैन्यनाथम् गुहं सदा शरणमहं प्रपद्ये ॥

सदाशिवसमारम्भाम् शङ्कराचार्यमध्यमाम्।
अस्मदाचार्यपर्यन्ताम् वन्दे गुरु परम्पराम्॥

समस्तजनकल्याणे निरतं करुणामयम्।
नमामि चिन्मयंदेवम् सद्गुरुम्ब्रह्मविद्वरम्॥

शिवं शिवकरं शान्तम् शिवात्मानं शिवोत्तमम्।
शिवमार्ग-प्रणेतारम् प्रणतोस्मि सदाशिवम्॥

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यम् भर्गोदेवस्य धीमहि धियो यो नः प्रचोदयात्

मङ्गलं भगवान् विष्णुः मङ्गलं गरुडध्वजः।
मङ्गलं पुन्डरीकाक्षः मङ्गलायतनो हरिः॥

सर्व मङ्गल माङ्गल्ये शिवे सर्वार्थसाधिके।
शरण्ये त्र्यम्बके गौरि नारायणि नमोस्तुते॥

रामायरामभद्राय रामचन्द्राय वेधसे।
रघुनाथाय नाथाय सीतायाः पतये नमः॥

वसुदेवसुतंदेवम् कंसचाणूरमर्दनम्।
देवकीपरमानन्दम् कृष्णं वन्दे जगद्गुरुम्॥

बुद्धिर्बलं यशोधैर्यम् निर्भयत्वम् अरोगता।
अजाड्यं वाक्पटुत्वं च हनुमत् स्मरणात् भवेत्॥

लोकवीरं महापूज्यम् सर्वरक्षाकरं विभुम्।
पार्वतीहृदयानन्दम् शास्तारं प्रणमाम्यहम्॥ स्वामिये शरणम् अय्यप्पा!

लोकाः समस्ताः सुखिनो भवन्तु । लोकाः समस्ताः सुखिनो भवन्तु ।

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान् मृत्योर्मुक्षीय माऽमृतात्॥

ॐ असतो मा सद्गमय तमसो मा ज्योतिर्गमय मृत्योर्मा अमृतङ्गमय।
ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।

ॐ शान्तिः शान्तिः शान्तिः। हरिः ॐ। श्री गुरुभ्योनमः। हरिः ॐ।